**<u>३ – तनादिगणः</u>**

तनादिगणे १० धातवः सन्ति | अत्र तेषां सार्वधातुकलकाराणां तिङन्तरूपाणि परिशीलनीयानि | तनादिगणीयेभ्यः धातुभ्यः कर्त्रर्थके सार्वधातुकप्रत्यये परे **कर्तरि शप्** (३.१.६८) इति सूत्रेण शप् विधीयते; तदा शपं प्रबाध्य **तनादिकृञ्भ्यः उः** (३.१.७९) इति सूत्रेण उ–विकरणप्रत्ययः विहितः भवति | अयम् उ–प्रत्ययः कीदृशः ? **तिङ्शित्सार्वधातुकम्** (३.४.११३) इति सूत्रेण यः प्रत्ययः धातुभ्यः विहितः अपि च तिङ् वा शित् वा अस्ति, सः सार्वधातुक–प्रत्ययः | यः कोऽपि प्रत्ययः धातुभ्यः विहितः परन्तु तिङ्शित् नास्ति, सः प्रत्ययः **आर्धधातुकं शेषः** (३.४.११४) इति सूत्रेण आर्धधातुक–प्रत्ययः भवति | तर्हि उ–प्रत्ययः धातुभ्यः विहितः, अपि च तिङ्शित् नास्ति इति कारणतः आर्धधातुक–प्रत्ययः अयम् | दशसु गणेषु तनादिगणः एक एव गणः यस्मिन् विकरण–प्रत्ययः आर्धधातुकः |

**तनादिकृञ्भ्यः उः** (३.१.७९) = तनादिगणे स्थितेभ्यः धातुभ्यः, कृ–धातुतश्च उ–प्रत्ययः भवति, कर्त्रर्थक–सार्वधातुकप्रत्यये परे | तन् आदिर्येषां ते, तनादयः बहुव्रीहिः, तनादयश्च कृञ् च तेषामितरेतरद्वन्द्वः तनादिकृञः, तेभ्यः तनादिकृञ्भ्यः | तनादिकृञ्भ्यः पञ्चम्यन्तं, उः प्रथमान्तं, द्विपदमिदं सूत्रम् | **कर्तरि शप्** (३.१.६८) इत्यस्मात् **कर्तरि** इत्यस्य अनुवृत्तिः; **सार्वधातुके यक्** (३.१.६७) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | **प्रत्ययः** (३.१.१), **परश्च** (३.१.२) इत्यनयोः अधिकारः; **धातोरनेकाचो हलादेः क्रियासमभिहारे यङ्** (३.१.२२) इत्यस्मात् **धातोः** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **तनादिकृञ्भ्यः धातुभ्यः उः प्रत्ययः परश्च कर्तरि सार्वधातुके** |

कृ–धातुः तनादिगणे एव पठितः इत्यस्मात् किमर्थं पुनः उक्तं सूत्रे यत् कृ–धातुतः उ–विकरणं भवति, इत्यस्मिन् प्रसङ्गे विवरणम् अपेक्षितम् | द्विवारं वदनेन नियमयति यत् कृ–धातोः उ–प्रत्ययः तु भवति, किन्तु अन्ये तनादिगणीय–विधयः कृ–धातुकृते न प्रसक्ताः | द्विवारं वदनेन नियमः कृतः, सीमा अध्यारोपिता यत् उ–प्रत्ययस्य एव विधानम्; एतदर्थमेव तनादिगणे स्थापितः; अन्ये तनादिगणीय–विधयः, कृधातुतः न भवन्ति |

<u>विकरणप्रत्ययः आर्धधातुकः, लकारः सार्वधातुकः—इत्यनेन समस्या वा ?</u>

उ–विकरणप्रत्ययस्य आर्धधातुकत्वात् तनादिगणीयेषु तिङन्तरूपेषु कीदृशः प्रभावः, इति काचन प्रमुखा जिज्ञासा | अत्र अस्माकं विषयः सार्वधातुकलकाराः (लट्, लोट्, लङ्, विधिलिङ्); यत्र विकरणप्रत्ययः आर्धधातुकः, तत्र लकारः कथं वा सार्वधातुकः भवेत् ? यथा प्रत्ययः, तथा लकारः किल; अयं सामान्यप्रश्नः जनानाम् | वस्तुतः विकरणप्रत्ययः कीदृशोऽपि भवतु नाम, लकारः सार्वधातुको वा आर्धधातुको वा इति प्रश्नः च विकरणप्रत्ययस्य स्वभावः च— अनयोः द्वयोः वार्तयोः न कोऽपि सम्पर्कः |

तर्हि सार्वधातुकलकारः नाम कः ? यत्र तिङन्तपदस्य निर्माणाक्रमे प्रक्रियायां धातुना कर्त्रर्थक–सार्वधातुक–प्रत्ययः साक्षात् दृश्यते (साक्षात् पुरतः), तत्र **कर्तरि शप्** इति सूत्रेण शप् विधीयते | यत्र **कर्तरि शप्** इत्यस्य प्रसक्तिः, तत्र सार्वधातुकलकारः इत्युच्यते |

**कर्तरि शप्** किं वदति ? कर्त्रर्थके सार्वधातुक–प्रत्यये परे, धातुतः शप् विहितः भवति | यथा भू + ति → **कर्तरि शप्** → भू + शप् + ति | अत्र भू–धातुः साक्षात् ति–प्रत्ययं पश्यति (ति सार्वधातुकः अस्ति) अतः **कर्तरि शप्** इति सूत्रस्य प्रसक्तिः अस्ति | अपरेषु गणेषु शपं प्रबाध्य अन्यैः सूत्रैः अन्ये विकरणप्रत्ययाः विहिताः | तेषु गणेषु अपि धातोः अग्रे सार्वधातुक–तिङ्प्रत्ययः साक्षात् दृश्यते चेदेव

तत्तत्गणस्य विकरणप्रत्ययः विधीयते | भ्वादौ शप्, दिवादौ श्यन्, तुदादौ श, तनादौ उ, गणमनुसृत्य धातोः अग्रे सार्वधातुक-तिङ्प्रत्ययः साक्षात् दृश्यते चेत् विकरणं विधीयते |

भ्वादौ भू + ति, दिवादौ नश् + ति, तुदादौ लिख् + ति— यदा सार्वधातुकतिङ् साक्षात् दृश्यते, तदा विकरणं विधीयते अतः सार्वधातुकलकारः | लट्, लोट्, लङ्, विधिलिङ् इत्येषु चतुर्षु लकारेषु एवं रीत्या धातु-तिङ्प्रत्यययोः मध्ये विकरणप्रत्ययः विहितः | तत्र विकरणभेदात् गणभेदः | अतः एषु चतुर्षु लकारेषु कस्यचित् धातोः तिङन्तरूपं ज्ञेयं चेत्, स च धातुः कस्मिन् गणे अस्ति इत्यवश्यं बोध्यम् |

आर्धधातुकलकारेषु गणस्य ज्ञानं नापेक्षितम् यतः मध्ये विकरणप्रत्ययः न विहितः | विकरणप्रत्ययः न विहितः यतोहि धातोः साक्षात् परं सार्वधातुकतिङ्-प्रत्ययः नास्ति | यथा लृटि सिद्ध-तिङ्प्रत्ययः अस्ति "स्यति" | भू + स्यति, इति स्थितिः | स्यति आर्धधातुकः न तु सार्वधातुकः | अत्र भू-धातुः सार्वधातुक-ति-प्रत्ययम् द्रष्टुं न शक्नोति यतः 'स्य' मध्ये अस्ति | सार्वधातुकप्रत्ययः साक्षात् पुरतः नास्ति अतः **कर्तरि शप्** इत्यस्य प्रसक्तिः नास्ति |

सारांशः अयं— **कर्तरि शप्** तदा कार्यं करोति यदा धातोः साक्षात् पुरतः सार्वधातुकप्रत्ययः अस्ति | धातोः साक्षात् पुरतः सार्वधातुकप्रत्ययः अस्ति न वा इति प्रश्नः, विकरणप्रत्ययस्य स्वभावः कः इति प्रश्नः, अनयोः प्रश्नयोः न कोऽपि सम्बन्धः; विकरणप्रत्ययः आयाति चेत् अनन्तरम् एव आयाति | अतः अनेन स्पष्टं यत् लकारः कीदृशः अपि च विकरणप्रत्ययः कीदृशः— अनयोः न कोऽपि सम्बन्धः |

तर्हि उ-विकरणप्रत्ययः आर्धधातुकः, अपि च अस्माकं चत्वारः लकाराः सार्वधातुकाः— अत्र न कोऽपि सङ्घर्षः, न कोऽपि क्लेशः |

<u>उ-विकरणप्रत्ययस्य आर्धधातुकत्वात् कीदृशः प्रभावः धातौ ?</u>

गुणकार्ये आर्धधातुकप्रत्ययः निमित्तं भवति वा ? यत्र प्रत्ययः आर्धधातुकः, तत्र **सार्वधातुकार्धधातुकयोः** (७.३.८४), **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनयोः सूत्रयोः प्रसक्तिः वा ? अस्त्येव | सार्वधातुकप्रत्ययो वा आर्धधातुकप्रत्ययो वा, द्वयोः सूत्रयोः प्रसक्तिः अस्त्येव | अधुना सार्वधातुकप्रत्ययः अपित् चेत्, तर्हि तेन गुणकार्यं निषिद्धं **सार्वधातुकमपित्** (१.२.४), **क्ङिति च** (१.१.५) इत्याभ्यां सूत्राभ्याम् | सार्वधातुकस्य अपित्त्वादेव गुणनिषेधः; आर्धधातुकस्य अपित्त्वात् न किमपि महत्त्वम् | आर्धधातुकप्रत्ययः कित् वा ङित् वा चेत्, तर्हि गुणकार्यं निषिद्धं **क्ङिति च** (१.१.५) इत्यनेन | उ-प्रत्ययः आर्धधातुकः; स च उ-प्रत्ययः कित् अपि न, ङित् अपि न, अतः गुणप्रसङ्गः भवति चेत्, तर्हि उ-प्रत्ययः गुणकार्यस्य निमित्तं भवति एव | तनादिगणे एतादृशः अवसरः अस्ति | यथा क्षिण् + उ → क्षेणु |

<u>सार्वधातुकलकारेषु तिङन्तपदस्य निर्माणार्थं त्रीणि सोपानानि सन्ति</u>—

१. विकरणप्रत्यय-निमित्तकम् अङ्गकार्यम्, तदा धातु-विकरणप्रत्यययोः मेलनम्
२. तिङ्प्रत्यय-सिद्धिः
३. तिङ्प्रत्यय-निमित्तकम् अङ्गकार्यं, तदा अङ्ग-तिङ्प्रत्यययोः मेलनम्

१. <u>विकरणप्रत्यय–निमित्तकम् अङ्गकार्यम्, तदा धातु–विकरणप्रत्यययोः मेलनम्</u>

तनादिगणे दश धातवः सन्ति—डुकृञ्, तनु, क्षणु, षणु, मनु, वनु, क्षिणु, ऋणु, घृणु, वृणु इति | निरनुबन्ध–रूपाणि इमानि—कृ, तन्, क्षण्, सन्, मन्, वन्, क्षिण्, ऋण्, घृण्, वृण् | अत्र अवधेयं यत् कृ–धातुः अजन्तः; अवशिष्टाः नव धातवः हलन्ताः | नव हलन्तधातवः सामान्याः अतः एकत्र तान् परिशीलयाम | कृ–धातोः प्रक्रिया किञ्चित् भिन्ना अतः तम् अनन्तरं पश्येम |

हलन्तधातोः उपधायां लघु इक् अस्ति चेत्, तर्हि **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन गुणकार्यं भवति | नव हलन्तधातवः सन्ति, तेषु पञ्च अदुपधधातवः— तन्, क्षण्, सन्, मन्, वन् | यत्र उपधायाम् अकारः अस्ति, तत्र इगाभावे गुणकार्यं नार्हम् | अतः एषां पञ्चानां धातूनां किमपि अङ्गकार्यं नास्ति | केवलं धातु–विकरणप्रत्यययोः मेलनम् |

तन् + उ → तनु
क्षण् + उ → क्षणु
सन् + उ → सनु
मन् + उ → मनु
वन् + उ → वनु

नव हलन्तधातुषु चत्वारः लघूपधधातवः (उपधायां लघु इक् येषां ते) | तत्र **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन गुणकार्यं भवति —

क्षिण् + उ → उपधायां लघु–इकः गुणः → क्षेणु
ऋण् + उ → उपधायां लघु–इकः गुणः → अर्णु
घृण् + उ → उपधायां लघु–इकः गुणः → घर्णु
वृण् + उ → उपधायां लघु–इकः गुणः → वर्णु

२. <u>तिङ्संज्ञकप्रत्यय–सिद्धिः</u>

अनदन्ताङ्गानां कृते तिङ्प्रत्यय–सिद्धिः जाता एव | यत्र अङ्गम् अनदन्तं, तत्र सर्वेषां धातूनां कृते सिद्ध–तिङ्संज्ञकप्रत्ययाः समानाः इति तु वयं जानीमः | अतः तनादिगणेऽपि सिद्ध–तिङ्प्रत्ययाः एते एव—

| <u>परस्मैपदम्</u> | | <u>आत्मनेपदम्</u> |
|---|---|---|
| | <u>लट्-लकारः</u> | |
| **ति**, तः, अन्ति | | ते आते अते |
| **सि**, थः, थ | | से आथे ध्वे |
| **मि**, वः, मः | | ए वहे महे |

लोट्-लकारः

| | |
|---|---|
| **तु**, तात्  ताम्  अन्तु | ताम्  आताम्  अताम् |
| हि, तात्,  तम्  त | स्व  आथाम्  ध्वम् |
| **आनि  आव  आम** | **ऐ  आवहै  आमहै** |

लङ्-लकारः

| | |
|---|---|
| **त्**  ताम्  अन् | त  आताम्  अत |
| **स्**  तम्  त | थाः  आथाम्  ध्वम् |
| **अम्**  व  म | इ  वहि  महि |

विधिलिङ्-लकारः

| | |
|---|---|
| यात्  याताम्  युः | ईत  ईयाताम्  ईरन् |
| याः  यातम्  यात | ईथाः  ईयाथाम्  ईध्वम् |
| याम्  याव  याम | ईय  ईवहि  ईमहि |

३. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–तिङ्प्रत्यययोः मेलनम्

अत्र तिबादीन् निमित्तं मत्वा अङ्गकार्यं क्रियते | यथा तनु इति अङ्गं, ति इति प्रत्ययः | तनु + ति → गुणः → तनो + ति | अस्मिन् सोपाने कार्यं स्वादिगणस्य सदृशम् | स्वादिगणे कथम् आसीत् इति स्मरन्तु | धातूनां विभागद्वयम्—अजन्तधातवः हलन्तधातवः च | किमर्थम् एवम् आसीत् ? यतः स्वादिगणे अजन्तधातूनाम् अङ्गम् असंयोगपूर्वं (चिनु); हलन्तधातूनाम् अङ्गं संयोगपूर्वं (शक्नु) इति | स्वादिगणे सर्वत्र अङ्गम् उकारान्तं किल, श्नु प्रत्ययस्य कारणात् | यत्र अङ्गम् उकारान्तं, तत्र उकारात् प्राक् द्वयोः हलोः संयोगः अस्ति चेत्, अङ्गं संयोगपूर्वम् इति उच्यते | यथा शक् + नु → शक्नु इति अङ्गं संयोगपूर्वं; चि + नु → चिनु इति अङ्गम् असंयोगपूर्वम् इति | अनेन भेदेन, स्वादिगणे भागद्वयस्य कार्यं त्रिषु स्थलेषु भिद्यते स्म | स्मरन्ति वा केषु त्रिषु स्थलेषु ? — (१) अजाद्यपित्सु संयोगपूर्वात् उवङ् / असंयोगपूर्वात् यण्; (२) वकारादि मकारादि च प्रत्यये परे विकल्पेन असंयोगपूर्वस्य उ–लोपः (३) असंयोगपूर्वात् हि–प्रत्ययस्य लोपः |

तनादिगणे अस्माकं नव धातवः सर्वे हलन्ताः एव, अपि च सर्वेषाम् अङ्गम् उकारान्तम् | परन्तु एषु नवसु हलन्तधातुषु, षण्णाम् अङ्गम् असंयोगपूर्वम्—तनु, क्षणु, सनु, मनु, वनु, क्षेणु | नाम एतेषां षण्णाम् अपि अङ्गे उकारात् प्राक् हलोः संयोगः नास्ति | नवसु, अवशिष्टानां त्रयाणां धातूनाम् अङ्गम् संयोगपूर्वम्—अर्णु, घर्णु, वर्णु इति | एषां त्रयाणाम् अङ्गे, उकारात् प्राक् व्यञ्जनयोः संयोगः अस्ति | अनेन संयोग–असंयोग–भेदेन, तनादिगणे यथा स्वादिगणे स्थलत्रये कार्यं भिद्यते स्म, अत्र तनादिगणे स्थलद्वये कार्यं भिद्यते — (१) वकारादि मकारादि च प्रत्यये परे विकल्पेन असंयोगपूर्वस्य उ–लोपः; (२) असंयोगपूर्वात् हि–प्रत्ययस्य लोपः | तनादिगणे उवङ् न भवति एव, अतः अयं उवङ् / यण् भेदः न वर्तते |

फलितार्थः एवम् — तनादिगणे यत्र अङ्गं संयोगपूर्वं भवति (शक्नु इव), तत्र तिङन्तरूपाणि स्वादिगणवत् भवन्ति परन्तु अजाद्यपित्सु

उवङ् स्थाने यण् एव भवति | तनादिगणे यत्र अङ्गम् असंयोगपूर्वम् (चिनु इव), तत्र तिङन्तरूपाणि स्वादिगणवत् एव भवन्ति |

यथा स्वादिगणे तनादिगणे अपि, संयोगपूर्व–अङ्गानि सामान्यानि (शक्नु इव अर्णु, घर्णु, वर्णु), असंयोगपूर्व–अङ्गानि (चिनु इव तनु, क्षणु, सनु, मनु, वनु, क्षेणु) विशेषाणि इति | नाम तनादिगणे ये सामान्यनियमाः सन्ति, अर्णु, घर्णु, वर्णु च तान् नियमान् अनुसृत्य प्रवर्तन्ते | असंयोगपूर्व–अङ्गानि (तनु, क्षणु, सनु, मनु, वनु, क्षेणु) आधिक्येन तान् नियमान् अनुसृत्य प्रवर्तन्ते एव—किन्तु स्थलद्वये विशेषाः भवन्ति |

तदाधारेण तनादिगणे प्रतिनिधि–चतुष्टयं स्वीक्रियताम्—

संयोगपूर्वाङ्गस्य परस्मैपदिधातुः =ऋण्
असंयोगपूर्वाङ्गस्य परस्मैपदिधातुः = तन्
संयोगपूर्वाङ्गस्य आत्मनेपदिधातुः = ऋण्
असंयोगपूर्वाङ्गस्य आत्मनेपदिधातुः = तन्

एषां धातूनां रूपाणि चतुर्षु सार्वधातुकलकारेषु (लट्–लोट्–लङ्–विधिलिङ्सु) जानीमः चेत्, तर्हि सर्वेषां तनादिगणीय–धातूनां सार्वधातुकलकार–रूपाणि जानीमः एव (कृ–धातुं विहाय) |

यथा स्वादिगणे, तनादिगणे अपि सिद्ध–तिङ्प्रत्ययाः चतुर्विधाः— हलादिपितः, अजादिपितः, हलाद्यपितः, अजाद्यपितः च | तर्हि तनादिगणे संयोगपूर्वाङ्गधातुभिः सह असंयोगपूर्वाङ्गधातुभिः सह च, एषां चतुर्णां प्रत्ययानां योजनेन कीदृशं कार्यं भवति इति मुख्यम् |

<u>संयोगपूर्वाङ्गधातूनां कार्यम्</u>—
हलादिषु पित्सु = गुणः | हलादिषु किमपि सन्धिकार्यं नार्हम् | अर्णु + ति → अर्णोति |
अजादिषु पित्सु = गुणः, तदा अवादेशः | अर्णु + आनि → अर्णो + आनि → अर्ण् + अव् + आनि → अर्णवानि |
हलाद्यपित्सु = **क्क्ङिति च** इत्यनेन गुण निषेधः; किमपि कार्यं नास्ति | अर्णु + तः → अर्णुतः |
अजाद्यपित्सु = **इको यणचि*** इत्यनेन यण्–आदेशः | अर्णु + अन्ति → अर्ण् + व् + अन्ति → अर्ण्वन्ति |

***स्वादिगणे अत्र **इको यणचि** (६.१.७७) इति सामान्यं यण्–विधायकं सूत्रं प्रबाध्य **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणप्रसक्तिः, तदा एकवारं यदा गुणनिषेधो भवति **क्क्ङिति च** (१.१.५) , तत्पश्चात् **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन उवङ्–आदेशः भवति (यथा शक्नु + अन्ति → शक्न् + उव् + अन्ति → शक्नुवन्ति) | परन्तु अस्मिन् सूत्रे "श्नु" प्रत्ययः उक्तं न तु "उ–कारः", अतः अस्य सूत्रस्य प्रसक्तिः तनादिगणे नास्ति | तर्हि तनादिगणे अजाद्यपित्सु यथासामान्यं यण्–आदेशः एव भवति | उ + अ → यणादेशः → व | अर्णु + अन्ति → अर्ण्वन्ति |

असंयोगपूर्वाङ्गधातूनां कार्यं केवलं स्थलद्वये भिद्यते | स्थलद्वयमपि अपित्सु एव; पित्सु न कोऽपि भेदः | अधः सम्यक्तया तोलयन्तु—

असंयोगपूर्वाङ्गधातूनां कार्यम्—

हलादिषु पित्सु = गुणः | तनु + ति → तनोति

अजादिषु पित्सु = गुणः, तदा अवादेशः | तनु + आनि → तनो + आनि → तन् + अव् + आनि → तनवानि

हलाद्यपित्सु =

– **क्क्ङिति च** इत्यनेन गुण निषेधः | तनु + तः → तनुतः

स्थलद्वये अपवादभूतकार्यम्—

– **लोटि हि–लोपः | तनु + हि → तनु**

– **वकारे मकारे परे, उकारस्य वा लोपः | तनु + वः → तन्वः / तनुवः**

अजाद्यपित्सु = **इको यणचि*** इत्यनेन यण्–आदेशः | तनु + अन्ति → तन् + व् + अन्ति → तन्वन्ति

*स्वादिगणे, यथा उपर्युक्तं हलन्तधातुषु (शक् इव) **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन यण्–प्रबाध्य उवङ्, अतः अजन्तधातुषु (चि इव) यण्–आदेशस्य साधनार्थं तस्य सूत्रस्य अपवादभूतसूत्रम् अपेक्षितं, **हुश्नुवोः सार्वधातुके** (६.४.८७) इति | परन्तु तनादिगणे यतः उपरि **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यस्य प्रसक्तिः नास्ति, तर्हि अत्र (असंयोगपूर्वाङ्गधातूनां कृते) यण्–आदेशस्य साधनार्थम् अपवादभूतसूत्रस्य आवश्यकता अपि नास्ति | अतः अत्र सामान्यसूत्रम् **इको यणचि** (६.१.७७) इत्येव कार्यं करोति |

**किमर्थं स्थलद्वये संयोगपूर्वाङ्गधातुरूपेभ्यः असंयोगपूर्वाङ्गरूपाणि भिद्यन्ते ?**

कस्यापि तनादिगणीय–धातोः अङ्गम् उकारान्तं भवति किल—ऋण् + उ → गुणः → अर्णु; तन् + उ → तनु | अनयोः अङ्गयोः भेदः कः ? अर्णु इति अङ्गे उकारात् प्राक् संयोगः अस्ति | **हलोऽनन्तराः संयोगः** (१.१.७) इत्यनेन द्वयोः हल्–वर्णयोः मध्ये स्वरः नास्ति चेत्, तयोः संयोग–संज्ञा भवति | अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः | तर्हि अर्णु इति अङ्गे, र्ण् इति संयोगः अस्ति | त्रिषु धातुषु (ऋण्, घृण्, वृण्) एवं भवति यतः तेषु, उपधायां ऋकारः अस्ति | उ–विकरणस्य प्रभावेन गुणः भवति, अपि च ऋकारस्य गुणः अर् अस्ति; अनेन गुणेन रेफस्य धात्वन्ते हला सह संयोगः भवति (ऋण् + उ → गुणः → अर्णु) | अवशिष्टेषु षट्सु धातुषु उपधायां ऋकारः नास्ति अतः गुणः अस्ति चेदपि (क्षिण् + उ → क्षेणु) संयोगः नैवोत्पन्नः | यत्र गुणः न भवति (तन् + उ → तनु), तत्रापि संयोगः नास्त्येव | अङ्गान्तात् उकारात् प्राक् संयोगः अस्ति चेत्, सः संयोगपूर्वः उकारः; अङ्गान्तात् उकारात् प्राक् संयोगः नास्ति चेत् सः असंयोगपूर्वः उकारः इति मुख्यम् |

a) **प्रथमभेदः**—परस्मैपदे लोटि मध्यमपुरुषैकवचने, **सेर्ह्यपिच्च** (३.४.८७) इत्यनेन सि–स्थाने हि–आदेशः | तदा सामान्यनियमः एवं यत् अङ्गम् अदन्तं चेत् **अतो हेः** (६.४.१०५) इत्यनेन हि–लोपः [वद + हि → वद], अङ्गम् अनदन्तं चेत् हि–लोपः न [शक्नु + हि → शक्नुहि; अर्णु + हि → अर्णुहि] | परन्तु उकारान्ताङ्गं चेत्, अपि च अन्त्यः उकारः असंयोगपूर्वः चेत्, तर्हि तत्र अङ्गम् अनदन्तं सत्यपि हि–लोपः भवति | सारांशत्वेन स्वादिगणे हलन्तधातुभ्यः "हि" तिष्ठति यथासामान्यम्; अपवादे अजन्तधातुभ्यः हि–लोपः [चिनु + हि → चिनु]; तनादिगणे सर्वे नवापि हलन्तः किन्तु तेषु नवसु, षण्णाम् अन्त्यः उकारः असंयोगपूर्वः अतः हि–लोपो भवति [तनु + हि → तनु] |

**उतश्च प्रत्ययादसंयोगपूर्वात्** (६.४.१०६) = प्रत्ययावयव–उकारात् प्राक् संयोगः नास्ति चेत्, परस्य हि–प्रत्ययस्य लुक् (लोपः)

भवति | न विद्यते पूर्वः संयोगः यस्मात्, सः असंयोगपूवः, बहुव्रीहिः, तस्मात् असंयोगपूर्वात् | उतः पञ्चम्यन्तं, च अव्ययपदं, प्रत्ययात् पञ्चम्यन्तम्, असंयोगपूर्वात् पञ्चम्यन्तम्, अनेकपदमिदं सूत्रेम् | **चिणो लुक्** (६.४.१०४) इत्यस्मात् **लुक्** इत्यस्य अनुवृत्तिः | **अतो हेः** (६.४.१०५) इत्यस्मात् **हेः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **अङ्गस्य असंयोगपूर्वात् प्रत्ययात् उतः च हेः लुक्** |

b) **<u>द्वितीयभेदः</u>**—हलाद्यपित्सु किमपि कार्यं नास्ति इति सामान्यनियमः | यत्र संयोगपूर्वम् उकारान्तम् अङ्गम् अस्ति, तत्र अस्य नियमस्य पालनं सर्वत्र | यत्र अङ्गम् असंयोगपूर्वम् उकारान्तम् अस्ति, तत्र हलाद्यपित् प्रत्ययः मकारादि वकारादि वा चेत्, तर्हि विकल्पेन अङ्गान्तस्य उकारस्य लोपः भवति | तनु + वः → तन्वः/तनुवः |

**लोपश्चास्यान्यतरस्यां म्वोः** (६.४.१०७) = प्रत्ययावयव-उकारात् प्राक् संयोगः नास्ति चेत्, अपि च उकारात् परे मकारः वा वकारः चेत्, तर्हि उकारस्य विकल्पेन लोपः भवति | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तादृशम् अङ्गं यस्य अन्ते उकारः अस्ति; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अङ्गान्ते उकारस्य लोपः, न तु पूर्णाङ्गस्य | 'अस्य' इत्यनेन पूर्वतनसूत्रे स्थितस्य "**असंयोगपूवस्य प्रत्ययस्य उतः**" इत्यस्य उल्लेखः | म् च व् च तयोरितरेतरद्वन्द्वः म्वौ, तयोः म्वोः | लोपः प्रथमान्तं, च अव्ययपदम्, अन्यतरस्यां सप्तम्यन्तं, म्वोः सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | **उतश्च प्रत्ययादसंयोगपूर्वात्** (६.४.१०६) इत्यस्य पूर्णतया अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **अस्य असंयोगपूवस्य प्रत्ययस्य उतः अङ्गस्य लोपः च म्वोः अन्यतरस्याम्** |

सारांशः एवं यत् अङ्गम् उकारान्तम् अस्ति चेत्, अपि च उकारात् प्राक् संयोगः नास्ति चेत्, अपि च परे मकारादिः वकारादिः च प्रत्ययः अस्ति चेत्, तर्हि उकारस्य लोपः भवति विकल्पेन |

<u>चतूर्णां सार्वधातुकलकाराणां तिङन्तरूपाणि</u>

सर्वप्रथमं धातोः अङ्गं संयोगपूर्वम् उकारान्तम्, असंयोगपूर्वम् उकारान्तं वा इति जानातु | तदा सर्वत्र अस्माकं चिन्तनक्रमः एवम्—
१. तिङ्प्रत्ययः पित् वा अपित् वा ?
२. तिङ्प्रत्ययः अजादिः वा हलादिः वा ?

अनयोः प्रश्नयोः उत्तरं जानीमः चेत्, तर्हि सर्वाणि रूपाणि जानीमः एव | अधुना एकवारम् अधःस्थानि उदाहरणानि अवलोकन्ताम् | तदा अनदन्ताङ्गानां सिद्धतिङ्प्रत्ययान् पुरतः स्थापयित्वा ऋण्, तन् (परस्मैपदे), ऋण्, तन् (आत्मनेपदे) इत्येषां तिङन्तरूपाणि चतुर्षु लकारेषु उच्चारयन्तु |

<u>परस्मैपदे लट्</u>— (स्थूलाक्षरैः लिखिताः प्रत्ययाः पितः | अन्ये अपितः |)

**ति**, तः, अन्ति
**सि**, थः, थ

**मि**, वः, मः

A. <u>संयोगपूर्वाङ्गधातुषु ऋण्–धातुः</u> [अर्णु इति अङ्गम्]

ऋण् + उ → उपधायां लघु–इकः गुणः → अर्णु इत्यङ्गम् | अधः सर्वत्र अर्णु इत्यङ्गम् अधिकृत्य कार्यम् अग्रे सरति |

अर्णु + **ति** →
अर्णु + तः →
अर्णु + अन्ति →
अर्णु + **सि** →
अर्णु + थः →
अर्णु + थ →
अर्णु + **मि** →
अर्णु + वः →
अर्णु + मः →

धेयं यत् अपित्सु अपि **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणकार्यस्य प्रसक्तिः अस्ति | किमर्थम् ? सर्वे तिङ्–संज्ञकप्रत्ययाः **तिङ्–शित्सार्वधातुकम्** इति सूत्रेण सार्वधातुकाः | परन्तु **सार्वधातुकम् अपित्** इत्यनेन अपित् सार्वधातुकप्रत्ययाः ङिद्वत् भवन्ति | तदा **क्क्ङिति च** इत्यनेन गुण–निषेधः |

**आदेशप्रत्यययोः** (८.३.५९) = इण्–प्रत्याहारात् कवर्गीयात् च परे अपदान्तः आदेशरूपी प्रत्ययावयवो वा सकारः अस्ति चेत्, तर्हि तस्य सकारस्य स्थाने षकारादेशो भवति | अस्य कार्यस्य नाम षत्वविधिः | इण्–प्रत्याहरे इमे वर्णाः अन्तर्भूताः— इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ, ह, य, व, र, ल | आदेशः तु मूर्धन्यवर्णस्य इत्येव उक्तं, परं **स्थानेऽन्तरतमः** इत्यनेन ट्, ठ्, ड्, ढ्, ण्, ष् इत्येषु मूर्धन्यवर्णेषु षकारस्य नैकट्यम्, अतः षकारः एव आदिष्टः भवति | नुम्, विसर्गः, शर्–प्रत्याहारस्थ–वर्णः च मध्ये सन्ति चेत् अपि कार्यं भवति | आदेशश्च प्रत्ययश्च आदेशप्रत्ययौ, तयोः आदेशप्रत्यययोः इतरेतरद्वन्द्वः | षष्ठ्यन्तम् एकपदमिदं सूत्रम् | **सहे साडः सः** (८.३.५६) इत्यस्मात् **सः** इत्यस्य अनुवृत्तिः | **नुंविसर्जनीयशर्व्यवायेऽपि** (८.३.५८) इत्यस्य पूर्णा अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | **इण्कोः** (८.३.५७), **अपदान्तस्य मूर्धन्यः** (८.३.५५) इत्यनयोः अधिकारः | अनुवृत्ति–सहितसूत्रम्— **इण्कोः आदेशप्रत्यययोः अपदान्तस्य सः मूर्धन्यः संहितायां, नुंविसर्जनीयशर्व्यवायेऽपि** |

B. <u>असंयोगपूर्वाङ्गधातुषु तन्–धातुः</u> [तनु इति अङ्गम्]

तन् + उ → तनु इत्यङ्गम् | अधः सर्वत्र तनु इत्यङ्गम् अधिकृत्य कार्यम् अग्रे सरति |

तनु + **ति** →

तनु + तः →

तनु + अन्ति →

तनु + **सि** →

तनु + थः →

तनु + थ →

तनु + **मि** →

तनु + वः →

तनु + मः →

परस्मैपदे लोट्—

**तु**, तात्   ताम्  अन्तु
हि, तात्,  तम्    त
**आनि   आव   आम**

C. संयोगपूर्वाङ्गधातुषु ऋण्–धातुः [अर्णु इति अङ्गम्]

अर्णु + **तु** →

अर्णु + तात् →

अर्णु + ताम् →

अर्णु + अन्तु →

अर्णु + हि →

अर्णु + तात् →

अर्णु + तम् →

अर्णु + त →

अर्णु + **आनि** →

अर्णु + **आव** →

अर्णु + **आम** →

तात् इत्यस्य मूलरूपं तातङ् | अयं प्रत्ययः ङित् अस्ति, अतः **क्क्ङिति च** इति सूत्रेण गुण–निषेधः |

हि बलात् अपित् | **सेर्ह्यपिच्च** (३.४.८७) इति सूत्रेण अपित्वम् अतिदिश्यते |

**सेर्ह्यपिच्च** (३.४.८७) = लोट्–लकारस्य सि इत्यस्य स्थाने हि–आदेशो भवति; स च हि अपित् भवति | सेः षष्ठ्यन्तं, हिः प्रथमान्तम्, अपित् प्रथमान्तं, च अव्ययपदम्, अनेकपदमिदं सूत्रम् | **लोटो लङ्वत्** (३.४.८५) इत्यस्मात् **लोटः** इत्यस्य अनुवृत्तिः |

**लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **लोटः लस्य सेः हि अपित् च** |

D. <u>असंयोगपूर्वाङ्गधातुषु तन्-धातुः</u> [तनु इति अङ्गम्]

लोटि ऋण्-धातुतः एकः एव भेदः— स च कः ?

एतावता पद्धतिः अवगता स्यात् | सर्वप्रथमं धातोः अङ्गं संयोगपूर्वम् असंयोगपूर्वं वा इति जानातु | तदा सर्वत्र अस्माकं चिन्तनक्रमः एवम्—

१. तिङ्प्रत्ययः पित् वा अपित् वा ?

२. तिङ्प्रत्ययः अजादिः वा हलादिः वा ?

अधुना अनदन्ताङ्गानां सिद्धतिङ्प्रत्ययान् पुरतः स्थापयित्वा ऋण्, तन् (परस्मैपदे), ऋण्, तन् (आत्मनेपदे) इत्येषां तिङन्तरूपाणि चतुर्षु लकारेषु उच्चारयन्तु |

**<u>डुकृञ् धातुः</u>**

तनादिगणे दशधातवः सन्ति; तेषु नव हलन्तधातवः उपरि परिशीलिताः | दशसु एकः धातुः अजन्तः; स च धातुः डुकृञ् करणे | **आदिर्ञिटुडवः** (१.३.५) इत्यनेन डु इत्यस्य इत्-संज्ञा, **हलन्तम्** (१.३.३) इत्यनेन ञ् इत्यस्य इत्-संज्ञा, **तस्य लोपः** (१.३.९) इत्यनेन तयोः लोपः | निरनुबन्धरूपं कृ इति |

पूर्वं यथोक्तं, कृ-धातुः तनादिगणे एव पठितः **तनादिकृञ्भ्यः उः** (३.१.७९) इति सूत्रेण, किन्तु सूत्रे कृ-धातुः पुनः उक्तं किमर्थम् इति चेत्, कृ-धातोः उ-प्रत्ययः तु भवति, किन्तु अन्ये तनादिगणीय-विधयः कृ-धातुकृते न प्रसक्ताः | द्विवारं वदनेन नियमः कृतः, सीमा अध्यारोपिता यत् उ-प्रत्ययस्य एव विधानम्; एतदर्थमेव तनादिगणे स्थापितः; अन्ये तनादिगणीय-विधयः, कृ-धातुतः न भवन्ति | वक्ष्यमाणेन विशिष्टसूत्रत्रयेण धातुविकरणप्रत्यययोरङ्गं व्यावहारिकतया द्विविधं, तदा च तिङ्प्रत्ययः वकारादिः मकारादिः यकारादिः चेत्, प्रक्रिया अपरेभ्यः तनादिगणीयधातुभ्यः भिद्यते |

<u>कृ-धातोः अङ्गद्वयम्</u>

१) पित्सु प्रत्ययेषु— कृ + उ → **सार्वधातुकार्धधातुकयोः** इत्यनेन इकः गुणः → कर् + उ → करु इति अङ्गम् |

२) अपित्सु प्रत्ययेषु— कृ + उ → **सार्वधातुकार्धधातुकयोः** इत्यनेन इकः गुणः → कर् + उ → करु → **अत उत्सार्वधातुके** इत्यनेन अपिति प्रत्यये परे, करु इत्यस्य अङ्गस्य अकारस्य स्थाने उकारादेशः → कुरु इति अङ्गम् |

**अत उत्सार्वधातुके** (६.४.११०) = उप्रत्ययान्तकृ-धातोः ह्रस्व-अकारस्य स्थाने उकारादेशो भवति किति ङिति सार्वधातुक-प्रत्यये परे | अतः षष्ठ्यन्तम्, उत् प्रथमान्तं, सार्वधातुके सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **उतश्च प्रत्ययादसंयोगपूर्वात्** (६.४.१०६) इत्यस्मात् **उतः**, **प्रत्ययात्** चेत्यनयोः अनुवृत्तिः | विभक्तिपरिणामेन पदद्वयं षष्ठ्यन्तं कृत्वा उतः प्रत्ययस्य → **येन विधिस्तदन्तस्य**

(१.१.७२) इत्यनेन तादृशम् अङ्गं यस्य अन्ते उ इति प्रत्ययः → उप्रत्ययान्तस्य (अङ्गस्य) | **नित्यं करोतेः** (६.४.१०८) इत्यस्मात् **करोतेः** इत्यस्य अनुवृत्तिः | **गमहनजनखनघसां लोपः क्ङित्यनङि** (६.४.९८) इत्यस्मात् **क्ङिति** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **करोतेः उप्रत्ययान्तस्य अङ्गस्य अतः उत् क्ङिति सार्वधातुके** |

अग्रे मनसि भवेत् यत् करु / कुरु असंयोगपूर्वाङ्गम् | यत्र च असंयोगपूर्वाङ्गकार्यं भवति, तत्र च **लोपश्चास्यान्यतरस्यां म्वोः** (६.४.१०७) इत्यस्य अपवादभूतसूत्रं **नित्यं करोतेः** (६.४.१०८), येन वकारमकारादौ प्रत्यये परे कृ-धातोः प्रत्ययावयव-उकारस्य लोपः नित्यं भवति | ततः अग्रे च **ये च** (६.४.१०९) इत्यनेन यकारादि-प्रत्यये परे अपि कृ-धातोः प्रत्ययावयव-उकारस्य लोपो भवति | अतः तिङ्-निमित्तकं कार्यम् एवं भवति—

<u>असंयोगपूर्वाङ्गधातूनां कार्यम्</u>—

पित्सु <u>करु</u> इति अङ्गम्—
हलादिषु पित्सु = गुणः | हलादिषु किमपि सन्धिकार्यं नार्हम् | करु + ति → करोति
अजादिषु पित्सु = गुणः, तदा अवादेशः | करु + आनि → करो + आनि → कर् + अव् + आनि → करवाणि)

अपित्सु <u>कुरु</u> इति अङ्गम्—
हलाद्यपित्सु =
- **क्क्ङिति च** इत्यनेन गुण निषेधः | कुरु + तः → कुरुतः
  स्थलद्वये अपवादभूतकार्यम्—
- लोटि हि-लोपः | कुरु + हि → कुरु
- वकारे मकारे यकारे परे, उकारस्य नित्यं लोपः | कुरु + वः → कुर्वः; अकुरु + म → अकुर्म; कुरु + यात् → कुर्यात्

अजाद्यपित्सु = **इको यणचि*** इत्यनेन यण्-आदेशः | कुरु + अन्ति → कुर् + व् + अन्ति → कुर्वन्ति

**नित्यं करोतेः** (६.४.१०८) = कृ-धातोः प्रत्ययावयव-उकारस्य नित्यं लोपो भवति वकारमकारादौ प्रत्यये परे | नित्यं प्रथमान्तं, करोतेः पञ्चम्यन्तं, द्विपदमिदं सूत्रम् | **उतश्च प्रत्ययादसंयोगपूर्वात्** (६.४.१०६) इत्यस्मात् **उतः**, **प्रत्ययात्** चेत्यनयोः अनुवृत्तिः, विभक्तिपरिणामेन पदद्वयं षष्ठ्यन्तम् उतः प्रत्ययस्य | **लोपश्चास्यान्यतरस्यां म्वोः** (६.४.१०७) इत्यस्मात् **लोपः**, **म्वोः** चेत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **करोतेः अङ्गस्य प्रत्ययस्य उतः नित्यं लोपः म्वोः** |

**ये च** (६.४.१०९) = यकारादि-प्रत्यये परे कृ-धातोः प्रत्ययावयव-उकारस्य लोपः भवति | ये सप्तम्यन्तं, च अव्ययपदं, द्विपदमितं सूत्रम् | **नित्यं करोतेः** (६.४.१०८) इत्यस्मात् **करोतेः** इत्यस्य अनुवृत्तिः | **उतश्च प्रत्ययादसंयोगपूर्वात्** (६.४.१०६) इत्यस्मात् **उतः**, **प्रत्ययात्** चेत्यनयोः अनुवृत्तिः | **लोपश्चास्यान्यतरस्यां म्वोः** (६.४.१०७) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **ये च करोतेः अङ्गस्य प्रत्ययस्य उतः लोपः** |

*यथोक्तं, तनादिगणे **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यस्य प्रसक्तिः नास्ति, अतः अत्र (असंयोगपूर्वाङ्गधातूनां कृते) यण्-आदेशस्य साधनार्थम् अपवादभूतसूत्रस्य **हुश्नुवोः सार्वधातुके** (६.४.८७) इत्यस्य आवश्यकता नास्ति | तदर्थम् अत्र सामान्यसूत्रम्

**इको यणचि** (६.१.७७) इत्येव कार्यं करोति |

<u>परस्मैपदे लट्</u>— (स्थूलाक्षरैः लिखिताः प्रत्ययाः पितः | अन्ये अपितः |)

**ति**, तः, अन्ति
**सि**, थः, थ
**मि**, वः, मः

<u>असंयोगपूर्वाङ्गधातुषु कृ धातुः</u>

पित्सु कृ + उ → करु इत्यङ्गम् | अपित्सु कृ + उ → करु → कुरु इति अङ्गम् | अधः सर्वत्र इमे अङ्गे अधिकृत्य कार्यम् अग्रे सरति |

+ **ति** →
+ तः →
+ अन्ति →
+ **सि** →
+ थः →
+ थ →
+ **मि** →
+ वः →
+ मः →

अधुना अनदन्ताङ्गानां सिद्धतिङ्प्रत्ययान् पुरतः स्थापयित्वा कृ (परस्मैपदे), कृ (आत्मनेपदे) इत्यनयोः तिङन्तरूपाणि चतुर्षु लकारेषु उच्चारयन्तु |

<u>तनादिगणीय-धातवः</u>

डुकृञ् करणे → करु → करोति / कुरु → कुरुते
तनु विस्तारे → तन् → तनु → तनोति/तनुते
क्षणु हिंसायाम् → क्षण् → क्षणु → क्षणोति/क्षणुते
षणु दाने → सन → सनु → सनोति/सनुते
मनु अवबोधने → मन् → मनु → मनुते
वनु याचने → वन् → वनु → वनुते
क्षिणु हिंसायाम् → क्षिण् → क्षिणु/क्षेणु → क्षिणोति/क्षेणोति, क्षिणुते/क्षेणुते
ऋणु गतौ → ऋण् → ऋणु/अर्णु → ऋणोति/अर्णोति, ऋणुते/अर्णुते

घृणु दीप्तौ → घृण् → घृणु/घर्णु → घृणोति/घर्णोति, घृणुते/घर्णुते
तृणु अदने → तृण् → तृणु/तर्णु → तृणोति/तर्णोति, तृणुते/तर्णुते

**संज्ञापूर्वको विधिरनित्यः** इति वार्तिकेन एषु चतुर्षु धातुषु **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन गुणकार्यं भवति विकल्पेन | एकस्मिन् पक्षे भवति, अपरस्मिन् पक्षे न |

Swarup – July 2013 (Updated November 2015)